# विश्वसंस्कृतदिवस-राष्ट्रियसंगोष्ठी

## “भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा”

## १८-१९, अगस्त, २०१९

## संस्कृत-पालि-प्राकृतविभागः, विश्वभारती, शान्तिनिकेतनम्

-----***-----

संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिरित्यादिवचनैः संस्कृतस्य देवभाषात्वं मनीषिभिः स्वीकृतं प्रख्यापितञ्च। अस्या भाषाया अध्ययनेन नरोऽपि देवत्वं विन्देदिति सुधियामनुभवः। परन्तु आधुनिके काले केचन संस्कृताध्यायिनः हीनम्मन्यतया ग्रस्ताः परिलक्ष्यन्ते। नैके शास्त्रव्युत्पन्ना अपि संस्कृतविषयाणां गौरवातिरेकमजानानाः संस्कृतविद्वेषिकृतोपलम्भान् तूष्णीं सहन्ते। संस्कृतविषयाणां माहात्म्यबोधेन संस्कृतज्ञाः स्वोत्कर्षमनुभविष्यन्तीति धिया एतादृश्याः संगोष्ठ्याः समारम्भः। संस्कृतभाषायां प्रतिपादितानां विषयाणां व्यापकता कदाचित्सहस्रमुखेनापि शेषेण प्रतिपादयितुमशक्यम्। दृष्टान्ततया यदि व्याकरणविषयस्यैवोल्लेखः क्रियते तर्हि इदं वक्तुं शक्यते यद् विश्वस्य न कापि भाषा एतादृशी भवेद् यस्या व्याकरणप्रक्रियैवाजीवनं बहुभिः नैष्ठिकैरधीयमाना स्यात्। संस्कृतभाषायां प्रणीतानां वेद-तदङ्गोपनिषद्ब्राह्मणारण्यकधर्मशास्त्रपुराणेतिहासदर्शनायुर्वेदशिल्पशास्त्रवास्तुशास्त्रयोगादिविषयाणां महत्त्वं व्यापकत्वञ्च व्याकरणवदिति संस्कृतज्ञा जानन्त्येव। आधुनिकेऽपि काले संस्कृतज्ञा स्वप्रतिभया विविधान् ग्रन्थान्प्रणयन्ति। संस्कृतभाषायां धर्म-दर्शन-नीति-सदाचारादि-प्रतिपादका बहवो ग्रन्था वर्त्तन्ते। भारतवर्षस्य विश्वस्मिन् याऽनन्या प्रतिष्ठा सा भारतीयसंस्कृतिमाधारीकृत्यैव प्रवर्त्तते भारतीयसंस्कृतेः प्रवाहिका आधारस्वरूपा च संस्कृतभाषायां प्रणीतानि वेद-वेदान्तोपनिषद्रामायणमहाभारतपुराणकाव्यनाटकधर्मशास्त्रार्थशास्त्रादीनि ग्रन्थरत्नान्येव। एतेषु ग्रन्थेषु भारतीयसंस्कृतेर्यदसाधारणं स्वरूपं वर्त्तते तदेवास्यां संगोष्ठयां चर्चायाः मुख्यो विषयः।

अस्यां संगोष्ठ्यां भागग्रहणाय संस्कृताध्यापकाः गवेषकाश्चामन्त्र्यन्ते। अत्र भागं जिघृक्षवः जुलाईमासस्य ($30^{th}$) त्रिंशं दिनाङ्कं यावत्स्वगवेषणाप्रबन्धस्य सारं पञ्जीकरणशुल्कं (Rs. 500/-) च यथासम्भवं प्रेषयन्त्वित्यनुरुध्यते।


संयोजकः
डॉ० सञ्जयकुमारमण्डलः
दूरभाषः-09434210090
ईमेल्-skumarmandal12@gmail.com

आवाहकः
प्र० अरुणरञ्जनमिश्रः
दूरभाषः-09434838309
ईमेल्-armishra59@gmail.com